कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

२०टी०
209

श्रीगणेशायनमः ॥ ॐ ॥ सानंदानंदवल्केस्फुरभिदुरसमामल्ल
वैरीसरोषाः कंसस्रभ्रांतरिस्त्वप्रियसरवसरसोजन्मभास्वत्स्वरू
पाः ॥ रज्येत्नः स्त्रीसभेभास्वदतुलमहिमश्रीभरारंगभूमौ कल्या
णं कल्पयंतां हरिहलधरयोर्नेत्रलक्ष्म्याः कटाक्षाः ॥ १ ॥ श्रीम
द्गोपालभट्टेन द्रविडक्ष्मासुपर्वणा । क्रियते रसमंजर्य्याः टीका
रसिकरंजिनी २ प्रारिप्सितरसमंजरीग्रंथनिर्विघ्नपरिसमाप्तये
स्वेष्टदेवतेभवो वस्तुनिर्देशेन दर्शयन् भानुकरनामा कविर्मंगल
माचरति ॥ आत्मीयमिति ॥ हरशिवाजयतीत्यध्याहार्यः ॥ यच्छ
ब्दावध्याहार्यौ ॥ यः प्रियतमापांगे दधानसन् निम्नोन्नतायां
भुविनीतो अप्रदेशे पुरतोप्ययतः आत्मीयस्वीयं धरणं दध्याति ॥ धर
ति ॥ प्रियया मृदुतरचरणकमलयोर्व्यथा न स्यादिति भावः । पुन
स्तस्याः श्रमाराकयांतराः पुष्पं स्वीयेन वक्करेणाकर्षति प्यालक्ष्याव
चिनोति । तस्याः भूषणार्थं विचनोतीति भावः ॥ पुष्पमिति जानायक
२

KKSU LIBRARY
RAMTEK
441 106
M-1671
Dist. Nagpur

Acc. No. ~~1978~~ M-1671
Title - रसिकरञ्जनी टीका.
on रसमञ्जरी of भानुदत्त.
Author - गोपालभट्ट.
Date - शके 1757

Subject - Rhetori
folio - 59.
Xerox - 118

Checked

1

वचनं ।शंकानाशिवितर्कैश्चेतिविम्भः ।।किंचअन्यत्रपीमृगत्वचावि
रचिततल्पे शय्यायां।।निजे भागे एकदेशे:निद्रातिस्वपति।।निपूर्वोद्रा
धातुःशयनार्थे।उपसर्गेणधात्वर्थोबलादन्यःप्रतीयते।।तिवच
नात्।कठोरमृगचर्मस्पर्शेनातिमृदुप्रियांगलतिकायाःपीडान
भवेदितिभीत्येतिभावः।।कथंभूतांप्रियतमांअंतप्रेमरसालसां।
अंतर्हृदयेयत्प्रेमतस्यरसःआस्वादनंतेनअलसां।निर्व्यापा
रां।अतःस्वयमेवकृतवानित्यर्थः।अंतःप्रेमभरालसांप्रिय
तमांइतिपाठेएवंभूतस्यापिहरस्यऽत्याद्व्यापारकरणस्य
प्रियतमामितिविशेषणानुकूलत्वंउचितमित्यर्थः।।निम्नंगभीरं
गंभीरमित्यमरः।स्यात्मरःपुरतोग्रतइत्यमरः।।शार्दूलविक्रीडितंवृ
त्तं।।तल्लक्षणंअर्कैरश्वैर्यतःशार्दूलविक्रीडितंदिसजगोसतत
गाः १संप्रतिग्रंथकरणप्रयोजनंनिरूपयति।।श्रीमद्भानुनाथ

राम·

विनाएषारसमंजरीरसः शृंगारादिस्तत्पुष्कामंजरीवमंजरीप्रका
श्यते॥प्रकटीक्रियतइत्यर्थः॥अन्यापिमंजरीभानुनासूर्येणप्र
काश्यतइतिशेषः॥किमर्थम्।विद्वज्जनस्यपडितसमूहस्यजन्म
नस्तदेवभृंगस्तस्यरसव्यासंगः रसः शृंगारादिस्तस्यव्यासंगः
आस्वादसंबंधेनव्याप्तिः।सएवहेतुस्तदर्थं।अनुष्टुप्छंदः २ प्रयोजनं
निरूप्यप्रस्तुतमाह॥तत्रेति।तस्यांरसमंजर्यांरसेषुहास्यादिषुशृंगारस्य
अभ्यर्हितत्वेनप्राधान्येनतदालंबनविभावत्वेनतस्यचशृंगारस्यआलं
बनविभावत्वेननायिकातावत्प्रथमनोन्निरूप्यते॥यमालंब्यरसउ
त्पद्यतेसआलंबनविभावः।विभावानुभावव्यभिचारिसंयोगाद्रस
निष्पत्तिरितिभरतसूत्रं॥तत्रविभावोद्विविधः।आलंबनउद्दीपन
श्चेति।आलंबनोनायकादिः।प्रकारैः उद्दीपनोद्यनरववक्रकथंक्तिपव
नादिभिः।नायिकानांवहुत्वाज्ज्ञातान्नविभावोद्विविधः।केवलवच
मात्रंसमाधानं ३ साचनायिकात्रिधात्रिः प्रकारैर्भियतइत्यर्थः।त्रिःप्र
कारमाह।स्वस्पयस्वकीया॥स्वशब्दात्स्वार्थेकइतिप्रत्ययेनेहेतानूर

र०टी०

तीदिश्येतिष्टः॥आयनेषीनीयैतिईयादिशः।परस्येयंपरकीया।कुजन
स्यपरस्यचेतिपरशब्दानुष्टः।फल्लप्रस्तयोःसमानैवसासामान्या।
सर्वसाधारणेत्यर्थः।तत्रेति।तत्रतासुस्वामिन्येवानुरक्ताअनुरा
गिणीस्वकीया॥अनुरक्तास्वकीया।इत्युक्तेक्वचिदनुरक्तायाःस्वकी
यत्वंस्यात्।अतःस्वामिन्येनोक्तं॥काचित्परगामिन्यनुरक्ताअतः
एवकारोवधारणेस्वामिन्येवेति॥नचेति॥परिणीतायांतद्विवाहि
तायांपरगामिन्यांनचाव्याप्तिः।व्याप्तिरूपलक्षणेनचेत्यर्थः।न
थाहि।लक्ष्यैकदेशेलक्षणस्यावर्त्तनमव्याप्तिः।तत्रस्वामिसंबंधि
नीनलक्षितायाएकदेशे।एवकाररूपावधारणेनव्यावर्तितरम
नुरक्तत्वरूपलक्षणस्याप्रवर्त्तनरूपामव्याप्तिः।अत्रपतिव्रतापा
तिव्रत्यएवलक्षणत्वात्॥तस्याःपरिणीतत्वेनस्वामिश्च्यपरगामितया स्या
परकीयत्वमपिसमायाति॥अत्रेति॥अत्रास्मिन्लक्षणेपतिव्रता
याएवलक्ष्यत्वात्॥नान्यस्यरस्ययोग्यव्यवछेदार्थएवकारः।तस्या

प्रतिपादिकाश्चिदनुसंदधाति।सानमंतव्या।यतःपरगामिन्या
स्तत्रालक्ष्यत्वात्॥एतदेवस्पष्टयन्नाह।नचपरणीतायांपर
गामिन्यामव्याप्तिः।१०

२

श्चपरिणीतत्वेनस्वामिसंबंधिनी।त्वंपरगामितयापरकीयात्वमपिसमा
याति॥अतःपतिव्रतेत्युक्तं।स्मयव्यापारेत्याह।अस्यास्वीयायाश्चे
ष्टाव्यापारःतामाह।भर्तुरित्यादि।भर्तुःपत्युःसुश्रूषापरिचर्याशीलस्यस
द्वृत्तस्यसंरक्षणंआर्जवंऋजोभावःसरलत्वंक्षमाशांतिः।शुचौतुचरिते
शीलमित्यमरः।शीलंस्वभावेसद्वृत्तेइतिविश्वः।यथेति।तमेवचेष्टामुदाहरति॥
गतागतमिति॥कुलनतभ्रुवायःसदाचारवान्वंशःकुलमित्यभिधीय
ते॥कुलसंबंधिनीत्वात्।नतेनम्रेभ्रुवौयस्यातांकुननतभ्रूशब्देनात्रपति
व्रतागम्यते।नासांनयनगतागतकुतूहलंगतंप्रेरणंआगतंआकुंचनत
द्विषयंकुतूहलंकौतुकंअपांगावधि।अपांगौनेत्रयोरंतौतदवधि।तत्परि
च्छिन्नं॥अपांगौनेत्रयोरित्यमरः।पुनःस्मितंईषद्धास्यंअधरएवविश्राम्यति॥
तमुल्लंघ्यनयातीत्यर्थः।ईषद्विकसितैर्गंडैःकटाक्षैःसौष्ठवान्वितैः।अलक्षितद्वि
जद्वारमुत्तमानांस्मितंस्मृतं१६वचोवचनंप्रियतमस्यश्रुतेरेवपृष्ठकस्यकर्ण
स्यैवनद्वयोरतिथिर्गोचरः।नान्यस्येत्यर्थः।पुनःश्चेद्यदिकदाचिदपिकालविशे
षेणकोपक्रमः।क्रोधारंभःनतदाकेवलंमनसिमज्जतिलीनोभवति।नवहिर्या

तिरित्यर्थः ॥ स्वभावोक्तिस्तुडिंभादेःस्वक्रियारूपगुणवर्णनंइति । पृथ्वीछंदः । तल्लक्ष
णं ॥ जसौजसजलावसुग्रहयतिश्चपृथ्वीगुरुः ॥ ३ ॥ स्वकीयातुत्रिविधा । त्रि
कारामुग्धामध्याप्रगल्भाचेतिप्रभेदेन ॥ तत्रेति ॥ तास्वित्यर्थः ॥ अंकुरः सं
जाताअस्येति । अंकुरितंतच्चतत्यौवनंतारुण्यंयस्याः सामुग्धा । अंकुरित
इतित्रिविधामुग्धामध्याप्रगल्भाचेति ॥ तत्रांकुरितयौवनामुग्धा । तांस्वरूपेण
विभज्यते । साचेति ॥ अज्ञातंसखीजनेनस्वयंवायौवनंयस्याःसा । एवंज्ञा
तयौवना । अंकुरितंतुअस्फुटोभयभावेनविभज्यते । तद्वदित्यर्थः ॥ तामेव
पुनर्विशेषयन्नाह । सैवचेति ॥ सैवचेति ॥ अज्ञातयौवनाज्ञातयौवनामु
ग्धैवक्रमशो । यथाक्रमंअज्ञातयौवनाज्ञातयौवनाचलज्जाप्रधार्ष्ट्यं । भयंसु
रतस्यापरिचयेनाशंकाउभाभ्यांपराधीनातत्प्रधानेतियावत् । रतिःसं
भोगक्रीयायस्याः सैवनवोढा ॥ इत्युपदिश्यते । नवसंभोगऊढायस्यास्त्रापि
नेत्यर्थः । नचक्रमशइत्यनेनविशेष्यविशेषणयथासंख्येनाज्ञातयौवना
लज्जापराधीनरतिः ज्ञातयौवनाभयपराधीनरतिरित्याशंकनीयं ॥ तथा
तत्वव्यभिचारात् ॥ प्रत्येकंउभयव्यापारदर्शनात् । तामेवपुनर्व्यापारांत

राम॰

७

रेणविशेषयन्नाह ॥ सैवसेति ॥ अज्ञातयौवनाज्ञातयौवनानूढेतिः ॥
अज्ञातयौवनाज्ञातयौवनाक्रमेणसभ्रभ्रयो विनयानम्रताऽंगसंकोच
नमितियावत् । तत्सहिताविश्रब्धनवोढ्सपदिश्यते ॥ अस्याः नवोढा
याश्चेष्टाव्यापारः ४ तामेवाह । क्रियाह्रियेति । क्रियाव्यापारस्तद्विषयेयाह्री
लज्जातयामनोहराकोपमार्दवं आल्यापनेयत्नंनवभूषणेनूतनाल
कारेसहाइष्टा ॥ मुग्धायथा ॥ अंकुरितयौवनायत्स्वरूपातामेवोदाहरति ॥
आज्ञप्तमिति ॥ कामदेवधरणीपालनकामस्यासौदेवस्यस एवधरणीपा
लोराजातेन ॥ किलेतिस्मरणेनिर्द्धारणेवा ॥ आज्ञप्तंतारुण्यसहायेन
मंत्रिरूपेणाहमपिसमस्तंजगतूज्येष्या । मीत्यवबोधितं ॥ एतेनाबा
रुण्यस्यबंधुत्वंव्यज्यते ॥ तदेवाह ॥ सुभेकासमयेनालण्यंयौवनंकर्त्त ।
रुणीदृशोमृगनेत्र्याः मनोगात्रेवस्त्कुस्थातुवास्तुविधिंविधास्यति । कुरि
ष्यति । इतिहेतोरिस्याहारः । दष्यारवंजनचातुरीमुखस्यतच्चाकात्यासे ।
धाधरीसुधाधरश्चंद्रः तस्येयंमाधुरी किंच । वाज्ञासुधासमुहहरिणाला
वण्यमनोहरत्वंआमंत्र्यते ॥ इतिदृष्ट्यादिषुसर्वत्रसंबध्यते । कामतार

ण्याभ्यांस्थितिर्विधीयते इति भवद्भिरप्यागस्मात्रस्थातव्यमित्याका
र्यतइत्यर्थः। लावण्यलक्षणंयथामुक्ताफलेषुछायायास्तरलत्वमिवांतरा
प्रतिभातियदंगेषुतल्लावण्यमिहोच्यते॥ इत्यादि। शार्दूलविक्रीडितंवृत्तं २
एवंसामान्यरूपासुधीवयःसंधिरूपेणोदाहृत्यसंप्रतिसिद्धाउदाहरति।
शशिमुखीचंद्रमुखीनायिकानीरात्जलात्तीरंतटंउपागता। समी
पतटं सीम्निमर्यादायां॥ नेत्रयोः तयोः किंइदंउत्पलंनीलकमलंच
मितिज्ञातुंश्रोत्रेकर्णेकरंहस्तंन्यस्यतिनितरांक्षिपति। वामदक्षिणवि
भागेनेतिभावः। आकांक्षापूरकत्वेनोक्तपोषकत्वात्। श्रोत्रेइतियौनद्
त्वंउत्पलदृक्चलनयोःसमानधर्मत्वेनवितर्कइतिभावः। किंच। शैवा
लस्यजलनील्याः। अंकुरास्तेषांशंकयाभ्रमेणसमानगुणत्वात्। रोमाव
लींरोमपंक्तिंप्रोञ्छतिस्पृशतीत्यर्थः। जलनीलीतुशैवालमित्यमरः। तथा
अविदितोज्ञातःश्रोणीभरोययासाश्रांताश्रांतास्मिभवामि। इतिसखीमुहुःपृ राम
च्छति। संशयालंकारः। तथाचकाव्यप्रकाशे॥ ससंदेहस्तुभेदोक्तौतदनु
क्तौचसंशयइति। शार्दूलविक्रीडितंवृत्तं २ सख्याज्ञातयौवनामुदाहरति। ४

स्वयंभूरिति ॥ काचित्सखीसखीपरिहसंत्साह ॥ हेअंभोजलोचनेत्वस्या
धरः । पयोनधरतीतित्वत्कुचस्सर्थः । यथाश्रुतव्याख्यानेरसहानिप्रसं
गः । स्वयंभूः स्वयंभवतीतिस्वयंभूः । शंभुः । शंसुखंभवत्यस्मादिति । कस्य
धनस्यभाग्यवतः नरवेनचंद्रवत्चंद्रः चूडायांशिरसियस्यभविष्यति ॥
शंभुरपिचंद्रचूडोभवति । चंद्रइति । चदिआल्हादेइत्यस्यधातोस्तेनाल्हादक
त्वंव्यंजितं । चूडाइवचूडेतिकुचोपरितननीलिमाध्वन्यते । सैवक्रमःशःइति
लक्षितं ॥ नवोढामुदाहरन्नाह ॥ ४ ॥ नवोढायथा । हस्तेधृतापीति ॥ हस्तेध
तानकेवलंवगाढ्यवरूढा ॥ शयनेशय्यायांविनिवेशितापिस्थापितापिन
केवलंकराधवलंविताहिक्रोडेभुजांतरेकृतापिआलिंगनादिव्यापारं
प्रापितापिनकेवलंस्थापितापि ॥ तथापिनववधूः नवोढावहिरेवगंतुय
तते ॥ यत्नंकरोति ॥ लज्जाभयपराधीनत्वादितिभावः । अथेसर्थांतरे ॥ जा
नीमहेवयंयः पुरुषः करेणपारदंस्थिरयितुंस्थिरीकर्तुंक्षमते ॥ समर्थः तस्य
वश्याः आक्रमणीयाः पारदाक्रमणमपिनरसहेनभवतीसत्रापिनथैवेसर्थः ॥
स्थिरयितुमित्यत्रादेशिकस्यानित्यतात्स्थितस्यस्यादेशाभावः । स्थापयितु

र॰टी॰

मितिवासमीचीनःपाठः। अत्रस्वभावोक्त्यनुगतोदृष्टांतालंकारः। वसंततिलका
वृत्तं॥ तल्लक्षणंज्ञेयं॥ भजाजगागोगः ५ विस्रब्धनवोढामुदाहरति। दरेति।
नवोढाविस्रब्धेतिशेषः। कस्यरसिकस्यसमीपउपसमिलित्वास्वपिति॥ क
थमित्याह। दरईषत्मुकुलितंमुकुलीकृतंनेत्रपाल्यौयस्यांक्रियायांतद्य
थास्यात्तथा। ईषदर्थेदराव्ययमित्यमरः। अत्रलज्जितादृष्टिर्नात्रमुकुलिता
तस्याज्ञानविधानात्॥ तथासतिप्रगल्भास्वभावेनमुग्धयामसंभवात्॥
नार्द्रमुकुलीसुवविशेषेणएतस्याःसंभवात्॥ नाभिभीता। भीताव्यादृष्टी
मुकुलितानतुलरसमित्यसंप्रदायइत्यलंविस्तारेण। पुनःनीवींनियमित
वान्नीव्यानियतःस्थापितौबाहुर्यत्रतथाकृतउरुयुग्मस्यबंधःपरस्प
रलग्नतायत्र। तथाकरेणकलितःकचस्थलयत्रस्वभावोक्तिरलंकारः।
नारिकंचुकग्रंथौनीवीस्यादितिवैजयंती॥ पुष्पिताग्रावृत्तं। अयुजनयुगर
तोयकारोयुजितनजौजरगाश्चपुष्पिताग्रा॥ अथमध्यामाह॥ समानौतुल्य
बलतयालज्जामदनौयस्याःसामध्यानायिका॥ लज्जामन्मथमध्यस्था
मध्येयंनायिकामतातिलक्षणात् ६ एषैवचातिप्रश्रयादतिविस्रब्धनवो
ढसपंपाठः। अनुदाहरत्वात्। असंभवत्वाच्च। याभिधाप्रवृत्तीनस्यात्

राम॰
८

धंवाधाष्ट्र्यप्रयुक्तवक्ष्यमाणमध्याव्यवहारसंभवतिआस्याः॥ मध्यायाश्चे
ष्टाक्रियाव्यापारसागसिसापराधेप्रेयसिकांतेसति ।धैर्यधीरतांवक्रोक्तिः
अर्थांतरन्यापकंवचनमित्यर्थः । अधीर्येअधीरतायापरूषानिष्ठुरवाक्
यस्याःसा ।मध्यायथा॥उदाहरतिस्वापयेति ।स्वापेनिद्रायांप्रियस्याननन
विलोकनहानिः ।विलोकनंउपष्टंभंगोभावाइत्यर्थः ।तथास्वापच्युतौनिद्रा
त्यागेप्रियकरग्रहणप्रसंगः इत्यर्थः ।चेष्टायेतिभावः ।इत्थंअमुनाप्रकारेण
सरोरुहमुखीपरिचिंतयंतीस्वायंनिद्राविधातुकर्त्तुंलज्जासागस्यदुःखक
रत्वादितिभावः॥हातुंसक्तुमपि ।कांतमुखावलोकनहानेरनुपेक्ष्यत्वादिति
भावः ।अपदे ।प्राप्ता ।उभयकोथवलवनानिष्टकार्यद्वयसमा ।नयतनेने
व्याकुलवभूवेत्यर्थः ।अत्रचविधानहानाभ्यांतुल्यवर्तनेयालज्जामदनतुल्य
वर्तनेनप्रकटैमवलक्षणस्वरूपअत्रहानिविधानयोरन्यतरानिश्चयाभा
वेनसंदेहालंकारः ।वसंततिलकावृत्तं ७ अथप्रगल्भांनिरूपयति ।पति
मात्रेति ।पतिमात्रविषयय:केलिकनापक्रीडासमुत्सुकाविदाप्रविणा
प्रगल्भावेश्यायांचपुनःकुलटायांन ।इयस्वैरिण्यांपतिमात्रविषयत्वस्या

भावान्॥ ननत्रनयोर्वेश्याकुलटयोरतिव्याप्तिः।अलक्ष्येलक्षणगमनम
तिव्याप्तिः।अस्याप्रागल्भ्यायाः रतिप्रीतिः।अन्यापेक्षासंभोगप्रीतिः।
आनंदात्संमोहः विचिंतता।अप्रलतेसर्थः।प्रथमरतिप्रीतेः उदाहरणंद
र्शयति॥ संस्पृश्येति॥ वामंवक्रंअक्षिणीयस्याः सावामाक्षी।श्रुतिगत
विकसत्कमलादिदर्शयतीतिभावः। सावसनांचलेवकुलोक्त्याप्रयुक्ते
नापिनाछादितंभवती।तिध्वन्यते॥श्रवणयोर्नीलोत्पलंनीलकमलंसू
र्योदयविकाशित्वाद्यास्यानिकुते।आछादयति।कमलविकासेनचिन्हेन
सूर्योदयंप्रियोमाजानीयादितिधियाइतिभावः। क्वसति।अंबुजनीपतेः
कमलिनीपतेः देवस्यसूर्यस्यसमुदयंजिज्ञासमानेज्ञातुमिच्छतिसति॥
अंबुजनीपतेरितितत्सनाथत्वात्।तस्यादितिभावः।सूर्योदयजिज्ञास
मानइतिरतेरंतर्भूतादिवासंभोगइतिरंतरायभूतादिवासंगइतिभा
वः।नदिवामैथुनंकुर्यादितिवाक्यात्।किंकृत्वा।जिज्ञासमानप्रियर
त्याह।स्तनंकनंसंस्पृश्यमर्दनंविधायवदनंआकलय्यस्वमुखेचुंबनार्थे
संजोज्येसर्थः।कंठस्थलंसाश्लेष्यआलिंग्यएतदालिंगनंकुंधजलाभि

धानं। जघनोपश्लेषाख्यं वावगंतव्यं॥ उक्तंच॥ अंकेस्थिताचशयने
मृगशावकाक्षीगात्रेप्रियस्यविशतीवनितांतरागात्। गाढोपगूढव
सनेनिरंतंयश्लेषप्राङ्गिरिहदुग्धाजलाभिधान १ उरुकालितनदीश्रोणि
रस्योपरिष्टाव्रजतिपरीहनारीस्त्रस्तकशोतरीया॥ करजदशनक्लसंचुं
बनंचाविधस्तुकथयतिजघनोपश्लेषभेदन्मुनींद्रइतितथाअधरवि
वंनिःपीय॥ पीउ-यानेरसस्यरूपंनिरूपितं॥ अंबरंअपाकृष्यदूरीक
स्य॥ अलकंव्युदस्यउक्षिप्य॥ एवंवाह्यरतेनालिंगनादिनानायिका
मुक्लंटइत्वेसर्थः। उक्तंच। मोहननाभवेतावद्यावदुत्कंठिताप्रिया॥
अन्यथानसुखोत्पत्तिः अशीतेऽर्ककराइव १ शार्दुलविक्रीडितंवृत्तं
आनंदात्संमोहइतिद्वितीयउदाहरणंदर्शयति॥ नखवक्षतमिति। का
चिन्नायिकापूर्वंकृतशीक्षांसखींकथयति॥ हेआलिसखीउरस्थले
वक्षसिनखक्षतं अधरतलेअधराधःप्रदेशेदरस्यव्रणं। नलंस्वरू
पाधरयोरितिविश्वः॥ बकुलमालिकाबकुलस्यवृक्षस्यपुष्पंबकुल
तस्यमालेवमालिकाच्युता। इतस्ततःपतिता। चपुनः मुक्तावलीविगलिता

र॰टी॰

मुक्ताहारस्त्रुटिताइत्यर्थः। प्रगल्भाप्रयुक्तसुरतवैचित्र्यं उभयत्रापि
हेतुरितिभावः एतन्नखक्षतादिस्वकलत्ररतांतसमयेसुरतांतका
लेआनंदभरत्वेपिमयाआलोकितं॥ ईषद्दृष्टंअयमर्थइतिविशेष
स्मरणंक्वेत्यर्थः। रतिः क्वचविशेषणंभोः क्वनस्मरामीत्यर्थः। तत्रच
तवशिक्षाविधिर्नायकेएवंव्यवहर्त्तव्यंएवंनेतिविशेषयकः क्वचन
जानामित्यर्थः। इत्थंकियत्कालंसंभोगत्रस्मृतौसुरतवैचित्र्यमनंतर
त्वेनदृभावेतिसंमोहइतिप्रगल्भायांरतवैचित्र्यासंमोहाववक्तव्ये॥
अन्यथापिएषयसंस्पर्शएवास्तिसंमोहकशब्दात्सुतवैचित्र्यस्यात्त
दृभावचरमतानिःप्रसंगः। अतस्तदुभयमपियुज्यतइतिभावः। ए
थोछंदः १० इत्थंनिरूपितेषुस्वीयामुग्धादिभेदेषुमध्याप्रागल्भेभेदां
तरैरनेकविधेइत्याह॥ मध्याप्रगल्भेतिमानावस्थायांमानप्रधानत्वे राम
प्रत्येकंत्रिविधोमध्याप्रगल्भेतित्रिप्रकारेत्यर्थः। तान्दर्शयति। धीरा
धैर्यवति। धीराधीराधैर्य्यवती। तत्रधीरांदर्शयति॥ व्यंग्येति। व्यंगोनु

मयः केनचित् चिन्हेने कोपस्य प्रकाशीयस्याः सा धीरा । न व्यंगप्रकाशो यस्याः
सा अधीरा । व्यंग्याव्यंग्यः कोपप्रकाशो यस्याः सा धीराऽधीरा । इयांस्तु विशे
षः । इदमेव चिन्हं ॥ मध्याधीरायाः कोपस्य व्यंजिका गीर्वाक् । वचनेनास्याः
कोपव्यक्तिरित्यर्थः । सामध्यायाअधीरायाः अधैर्यवसा परुषा निष्टुरवाक् ।
कोपस्य व्यंजिकेति शेषः मध्याधीराऽधीरायाः धैर्याऽधैर्यवसाः वचनधीर
त्वयोगि रुदितअश्रुविमोचनंअधीरत्वयोगि ते उभे एककालीने इति शे
षः । कोपस्य प्रकाशः प्रगल्भामपि तथैवेत्याह ॥ प्रौढायाः प्रगल्भायास्तु
धीरायाः रतोदास्यसुरतोदासीनत्वं कोपप्रकाशकमिति याज्यं । बाल
स्याषोडशवर्षात् उपरि तरुणी त्रिंशतिर्याव वृद्धं । प्रौढास्यापंचपंचा
सदवधिपरतो वृद्धा ता मतिनारीति रहस्ये । प्रगल्भाया अधीरायास्तु
तर्जनं वन्नित्रशिरः कंपादि ताडनादि ताडनं पुष्पमालादिना ॥ आ
दिशब्देन बंधनमपि ॥ प्रगल्भाया धीराधीराया रतोदास्यसुरतोदा
सीनत्वं तर्जनताडनादिके कोपप्रकाशके पूर्ववत् एवं धीरादिभेदा
नुद्यात्रासङ्घिः कत्वा प्ररमननमनू धनिराकरोति ॥ धीरादिभेदः स्वी

15

यायाएवनपरकीयाइतिप्राचीनानांलेखनेनलितं आज्ञामात्रेनविश्वा
सनीयं॥ यतःधीरत्वं। अधीरत्वंतदुभयंधीरादिनामपिआवश्यकत्वा
न्निश्चितंभवतीत्यर्थः। मानश्चपरकीयायानइतिवक्तुमशक्यत्वात्।
तत्रमध्याधीरामुदाहरति॥ लोलेति। काचित्सापराधंप्रियंप्रत्याह।
भोप्रियहेप्रिय। भवतोदेहेश्रमवारिधाराःश्रमजलकणाःस्फाराः
बहुलाःबभूवुःजाताइत्यर्थः। कथंभूतस्यभवः। लोलालिपुंजलोला
नांचचलानांसत्तृष्णानावाअलिभ्रमरपुंजःसमूहायस्मिन्। भवदंगसौ
गंध्यमाघ्रायेत्यर्थः। तस्मिन्निकुंजेव्रजतोगच्छतः। पुनःनलिन्याःक
मलिन्याःदलेनतस्यातिशयत्वात्॥ समीरवायुधीरंमंदंश्रमपरिहा
रणक्षममपीत्यर्थः। विधातुंकर्तुंसमीहेइच्छामि॥ लोलश्चलसत्तृष्ण
यावितिविग्रहः। मांविहायनिकुंजेव्रततनइतिवक्रोक्त्यासापराधंत्वं अ
त्रवक्रोक्तिरलंकारः वक्रोक्तिःश्लेषकाकुभ्यांवाच्यार्थांतरकल्पना राम०
मितिइंद्रवज्रावृत्तं॥ स्यादिंद्रवज्रायदितौजगौगः। मध्यामधीरा

८

मुदाहरति ॥ जातस्तइति । काचिन्मानिनी सापराधं कांतंप्रति रे धूर्त्त
अतिचित्रमेतदाकर्णयनामिसाह । तेनवनिशिरात्रौजागरोजा
गरणंजातः मदन्यनायकारनिवशादितिभावः ॥ यस्यजागर
स्तेनेत्ररक्तत्वंयुक्तमपर्य्यइतिभावितं । पुनः भवतात्वयाप्रवि
ततंयअतिशायितंमधुमघंनिः पीतंसत् ॥ अन्ययासहेत्यर्थः । मे
मनो । व्याघूर्णितं । चालितमेतत् । पुनः भ्राम्यंतोयेभंगामेघने
निविडेनिकुंजभवने । लतागृहेत्वंश्रीफलं श्रीफलस्यबिल्व
वृक्षस्यअवरूपफलं ॥ लब्धंप्राप्तंमदन्यस्याः कुचलक्षणफ
लमितिध्वनितं ॥ अविवक्षनवाच्यायस्तत्रवाच्यंभवेद्ध्वनौ । प्राण्यो
षधिवृक्षेभ्यः स्सणु । फलेलुहरतिलुक् ॥ यद्व । श्रीतस्यायौवनसं
पत्तेः । फलमिवफलं ॥ कुचरूपंतत्संभोगादिव्या ॥ पुनः इदंचि
तेएषः पंचषुः पंचइषवोवाणाः यस्यसः मांहुतवहक्रूरेः दुतव
होग्निस्तद्वक्रूरैर्दाहकैः शरैः कृंततीतिदिनतिफलंत्वयाप्राप्तंछेदनम

मेतिवैपरितीत्यर्थः। हर्षणश्चत्र हसनो मोहनो मूर्छनस्तथा॥ वि
रूपश्चैवकामस्यशराः पंचप्रकीर्तिताः १ यद्वा। अरविंदमशोकं
चचूतंपंचकोरकं। नीलोत्पलंचपंचैतेपंचवाणस्यसायकाः १
इतिएतेनस्वयंफलप्राणपाहपुष्पैरितिभावः। अत्रविरोधाल
कारः। विरोधः सोविरोधोपिविरुद्धत्वेनयद्वचति। शार्दूलवि
क्रीडित॥ धीराधीरामध्यामुदाहरति। कान्तानुरागेति। कान्ति
हृदति। भोक्रांतप्यनुरंजनतंत्रचतुरोसी। यद्वाकांतायामन्य
स्याअनुरंजनकेवलमनुरंजनंचतुरः किंतुमनोहरोसितस्या
मामनुमनोऽहरसिहरसीतिवक्रोक्तिः तस्यामाशक्तेः नकेवल
मिदमेवनाथोसिप्रभुरसि॥ उपतापकोसिइतिवक्रोक्तिः नाथनाक्ष
यंतोपतायैस्वर्य्यास्सिषु। किंचननयौवनेनभूषितासि। इदमेवभूष राम०
णंनविनयादितिवक्रोक्तिः। सुदशानायकयोरुक्थं एवंनिगद्यवक्ता

१

प्रियस्यवदनेविषयेसप्तमीनिःश्वस्यवाष्पैर्नेत्रांवुजैर्लुलिताविम
र्दितादृगंताद्दकोणान्निर्दिवाःप्रेरिताऽत्रवक्रोक्त्यश्रुपाताभ्यांधीरा
धीरत्वंस्पष्टमेव।वसंततिलकावृत्तं।प्रौढाधीरायथातथामुदाह
रति।नोतल्पमिति॥काचित्सखीवदतिहेकेतकगर्भगौरि।केतकाः
पुष्पकितकतस्यगर्भःतद्वद्गौरितल्पसज्यांनोभजसे।तथासुधाधा
रानुकारासुधाधाराअनुकुर्वंतिताःअमृतइवतुल्याइत्यर्थः।गौ
रीवाचोनजल्पसिउभयमपिक्रोधोदयादितिभावः।तथाक्रो
धप्रकाशच्छलात्व्याजात्परिजनेदृक्पातनकुरुतेइत्थंएवंदयि
तेप्रियेनत्कोपस्यसंगोपनंआच्छादनंस्यादेवचेत्।यदिपुनःसह
चरीसहचरीतिसखीसापिवक्रमुखवक्त्रेत्यर्थःस्मितंनकुर्वति
एवमुदासितायात्वयिबाहुवचनादिकर्वीतिवल्लभस्यसखीसाची
स्मितंमेत्वकीयकंमभ्यदित्यर्थः॥साचिवर्द्धजुगुप्सितइत्यमरः।
शार्दूलविक्रीडितंवृत्तं१२प्रौढामधीरामुदाहरति।प्रतिफलमिति॥

२० टी०

अचलकन्यापार्वती गिरिशं गिरिसं स्पृशति तनूकरोति स्वतेजसा एवंभूतं ईश्वरं करेण हस्तेन तर्जयामास। चित्रमेतत्। किंभूता पार्वती गिरिशं गिरिसं स्पृशति तनूकरोति। हरस्य शिरसि या इंदोः कला तस्यां स्वीयप्रतिफलं प्रतिबिम्बं अवलोक्य परस्याः अन्यस्याः वासं स्थितं आशंकमाना वितर्कयंती। किंभूतेन करेण कंपेन प्रचलानि प्रकर्षेण चलानि चंचलानि यानि वलयानि कंकणानि तेषां वलांतो भाषमाना या कांतिः शोभा तां भजतीति भाक् तेन सेव्यमानेन। अन्यापि। यथा आहुः। ध्वनिपूर्वेण तर्जयतीत्यर्थः। अत्र संशयालंकारः। मालिनीवृत्तं। तल्लक्षणं। ननमययुतेयं मालिनी भोगिलोकैः १४
प्रौढाधीराधीरामुदाहरति। तल्पोपांतमिति। प्रियतम तल्पोपांतं तल्पस्य सज्जायाः उपांतं समीपं उपेयुषि प्राप्तवति वक्रीकृतग्रीवया सापराधस्यास्य सम्मुखं वास्थितो नोतिष्ठति भावः। पुनः काकु राम० १०

व्याकुलत्वात्। काक्वामत्पराधज्ञात्वाकंपितेति भीतिपुतध्वनिविकारेण
व्याकुला अन्यथाकथनेनवाक्यस्यतस्मिन्सतिसावितर्जकभूत्वाहसि
तंकथमपरागोपनंका काकरोतीति तेनस्फूर्जंतीविकसंतीकपोलयोः
श्रीर्यस्याः सातपा। पुनः हस्तेन्यस्तकरौयेनतस्मिन्सतियदिइयंह
संतीलक्ष्यतेतेनतः प्रसन्नेसतिज्ञात्वाम्गदशाद्दृष्टयोर्दृष्टभेदात्तदपराध
सूचकरूपाः विस्फुरिताः संक्रोधः प्रकाशंप्रेरिताः किंभूताः दृष्टमः
लाक्षारसेनजावकेनक्षालितंयत्कश्रौव्याः एष्टंतस्येयेनफषाः कांति
धरास्तत्कुन्मासलाः पृथुलाः रुचोदीसयोयायासांताः। काकुस्त्रियांवि
कारोयः शोकभीत्यादिभिर्ध्वनेरित्यमरः। प्रोष्ठीतुशफरीद्वयोरित्य
मरः। शार्दूलविक्रीडितंवृत्तं १५ एवंधीरादिभेदानुक्तानपि
प्रकारांतरेणाह। युतेचेति। षड्भेदोमध्याप्रौढाविषया। द्विधाहिप्रका
रेणभिद्यतइत्याह। ज्येष्ठाकनिष्ठाचेति परिणीतत्वेसतिभर्तुःस्नेह
कृतंज्येष्ठाकनिष्ठत्वंनतुवयः। कृतमिति तत्रस्नेहतारतम्येप्यधिक

स्नेहास्विसादिष्टनातिव्याप्तिः।। तासां परिणीतत्वादित्यर्थः।धीराज्ये
ष्टाकनिष्टाचपप्या।।तप्योदाहराति। एकस्मिन्निति। कोपोदाक्षिण्ए
नापकेइतियोज्यं।।सरोरुहदशोनामिकपाएकास्मिन्नूशयने एक
स्याशाज्यायांनिद्रांविज्ञाय तयोर्मध्ये एकांनायिकांपल्लविस्तारि
तः अवगुंठनपटोयस्य[illegible]लतिशेषः।मांइच्छतितौभियाउत्कंघ
टःदृष्टवान्।ततःअन्यस्याःज्येष्टायाःसविधंसमीपंसमेत्यसआ
गसनिभृतंव्यालोलाक्ष्यंचलायाःहस्तांगुल्यःतासांव्यापारैःप्रेम
रूपैःवसनस्यअंचलं प्रतिचलयत्।स्वापस्युतिंनिद्राभंगंकि
प्नेवान्।तयासहवरीरससयातयाकृतवानित्यर्थः।।निभृतेति
तस्याःश्रवणाशांकलतिभावः।यत्रपूर्वढ्विस्त्रौत्वेसुकंभावपन्नून् रामं०
नास्नेहत्वेकनिष्टात्वं।।उत्तरार्द्धेरसोत्कंटवास्नेहेनाधिक्यस्यष्टमेवा
ति।। शार्दूलविक्रीडितंवृत्त १६ अधीराज्येष्टाकनिष्टाचयथातथो

११

दाहरति।अंतरिति॥दक्षिणानायकेतिशेषः। घनेनायकेरतिके
लियोग्येतिविंडघनेप्रियतमेदृपश्यन्।किंभूते।अंतःकोपकषायि
ते।अंतर्मनसियःकोपःक्रोधः।तेनकलुषीकृतेकषायिते।तत्र
तयोर्मध्ये एकापुष्पस्यअवचयायवर्तुलायनर्मवदनांसमायोज
यत्।पुष्पावचयव्याजेननम्रमुखीकुर्वन्नित्यर्थः।अन्यांज्येष्ठांन
ववधून्यांन्यायिकांसमालिंगति।किंभूतांअन्यां।अर्द्धउन्मीलितेय
लोचनेयातयोर्यअंचलौकोणौतयोर्यचमत्कारासेरभिरामंआन
नंयस्यासातां।अत्रार्द्धमुकुलदृष्टिः यथाअर्द्धव्याकोशेतकिंचिभ्र
मंतातारकौटौ।यथार्द्धमीलितासार्द्धमुकुलार्थैसुखप्रदद्दाति।पुनः
स्मेरंअर्द्धयास्मिन्नेवंभूतोधरपल्लवोयस्याःसातां।अत्रापिपूर्ववत्स
वीर्द्धतरयोःकनिष्ठाज्येष्ठाविभागः १७ शार्दूलविक्रीडितंवृत्तं॥
धीराअधीराज्येष्ठायथादाहरति।धेर्याधैर्येति।प्रियःकांतःएणीद
शाप्पुष्टिःयेअनंतकांतिसविररत्नदद्धन्यस्तवान्किमर्थंप्रीनयतये

२०टी०

वेसर्थः ।किंभूतयोः धैर्यंचअधैर्यंधैर्याधैर्यंतयोः धैर्य्याधैर्य्ययुक्तयो
रित्यर्थः गृहगोणादिकइलचप्रसयस्तेननिगृहीतायोर्धैर्य्यायुक्तौ
योरित्यर्थः ।ग्रहरोणादिकइलचप्रत्ययग्रहिलइतिसाधनीयंकिं
तुप्रथमतः एकस्याः कनिष्ठायाः करेरलंकलयतु परस्याअन्यस्या
ज्येष्ठायाहस्तात्हस्तोत्सव्ययेहस्तेनहस्तेनहस्तेहस्तेवागृहीत्वेदंयु
दुंप्रवृत्तमित्यास्मिन्नर्थेतन्निपातव्याजात् ।कंचतदीस्पर्शनआनंद
ओविंदति ॥ अनुभवति ।अनुस्फुटं ज्येष्ठाकनिष्ठे उदाहर — —
त्रमेलंकारः ।छलमन्यामुराधेनमुदायस्यप्रकाशनमिति ॥ शार्दूल
विक्रीडितंवृत्तं १८ इस्त्रकृत्तौसास्वकीयांनिरूप्यपरकीयांनिरूपय
ति ॥ अप्रकटेति ।अप्रगटेहः कोपिना — — — — तिभीसापर राम
स्मिन्पुरुषेअनुरागंयस्यासापरकीया ।अप्रगटपुरुषेसक्तेमुग्धा
यामतिव्याप्तिः ।एतदुक्तेपरपुरुषेतिप्रगटपरपुरुषानुरागेसक्ते
वेश्यायांअतोप्रगटेतिसा चद्विविधादिप्रकारापरोढापरेणान्येनऊढा

१२

परिणीताकन्यकाच॥अनुपरोढायाभर्त्राद्यधीनत्वेनपरकीया—
वंयुक्तंकन्यकायास्तुकथमित्याह॥कन्यकायाइति॥अन्याधीनत्व
मेवपरकीयात्वेप्रयोजनमितिभावः।साकिंस्वभावादित्याह॥अ
स्याःसकलाचेष्टागुप्तैव॥अन्यानवलोकितेत्यर्थः।परोढायानयो
दाहरति॥अयमिति॥काव्यप्रच्छन्नकामिनीसखीभंग्यंतरेणाह॥
हेसखीकुसुमशरःकामःस्तस्यसेवायैआराधनायसमुचितोयोग्यः
अयंविद्यमानःरेवाकुंजेरेवानदीतत्संबंधीकुंजःलताद्यावृतप्रदेशः।
अथयोष— कुंदध्याहारोमध्येव्यवहर्त्तव्यं।उक्तंच।येनाप्नोतिप
रांभ्रमिंपदमुक्तंविधीयते।तदव्ययंसमस्ता——— व्याख्यावि
चक्षणैरिति॥किंच।वेलायथाकालंयद्वा।कुंजमर्य्यादायांतस्मात
टीतियावत्॥वेलाकोलमर्य्यादयोरित्यमरः।दरइषत्छालत्यावि
कसंत्याएवेलापुष्पाणिफलानिवातासापरिमलस्तत्संबंधात्ल
ब्धोगंधःविशेषायास्मिन्।नचस्माटनभिदलदलापरिमलायत्रेत्यर्थः

२०टी

एवंभूतोयंअनुभूयमानइत्यर्थः।समीरोवायुःवर्त्ततइतिशेषः।अत
एवसमीरयतिकामः इतिसमीरइत्यर्थता।।विमर्दोत्थिपरिमलोगंधेजन
मनोहरइत्यमरः।किंचनवजलदविन्यासेनवीनमेघरचनायांच
तुरा।अतएवधन्याभर्त्तारमिह।नयरूपमदुपकारकत्वेनापुलयध
ती — पुरोविलसतीप्रावृट्वर्षाकालः मांआनंदयति।।इतिशेषः।।
इयमितिस्त्रीत्वेनसखीत्वधन्यते।हेसखिचेतश्चित्तंपराधीनंप
रास्मिन्पुरुषेअधीनंतद्गुणविशेषवशीलतेननतदप्राप्त्याइमामव
स्थांप्राप्तंकिमपिसंगमोपायरूपंकुसंकर्तुमृगयते।विचारयति।
मृगअन्वेषणेकण्ड्वादिः।शिखरिणीवृत्तं।।तल्लक्षणंतु।रसैरुद्रै
छिन्नायमनसभलागःशिखरिणी १६ परोढायायुत्पादिभेदचतु
त्वेकथंत्रिविधेत्याशंक्यमानअत्युत्तरयन्नाह।।गुप्तेत्यादि।।तत्रा
पिगुप्तात्रिविधात्रिप्रकारा।।त्रैविध्यमेवदर्शयति।।वृत्तसुरतगोप राम
नेत्यादियथातथोदाहरति।।एकेनैवपद्येन।।श्वश्रुरिति।कापि

१३

परपुरुषचिन्हानि कुर्वाणा सखीं वदति। हे सखि श्वश्रूस्तु कुप्यतु। सुहृ
द्दौ विद्विषतु॥ अथवा यातरः भ्रातृभार्या निहंतु। तद्वचनाकरणाद्व्या
जेन वक्रोधादिति भावः। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं
इत्यमरः। किंतु तस्मिन्मंदिरे ताभिस्सदिष्टे गृहे इत्यर्थः। पुनः अ
— यवारं मया स्वापो निद्रा नैव विधेयः। कर्त्तव्यं स्वापाविधे
हेतुमाह॥ आखोर्मूषकस्य आक्रमणाय ग्रहाय कोणकुहरात्
गृहप्रांतप्रदेशात्॥ उत्फालमातन्वती मार्जारी विडाली खरैः
तीक्ष्णैर्नखैः मे मम कां कां दुर्दशां विडंबनां न करोति॥ नल्लत
वति॥ कांकामित्सर्वीप्सयोरिति दिभीर्वः। अपितु या दुर्दशा न
तासां तवाज्ञातैवालीति भावः। एतेन कृतवर्तिष्यमाणपरपुरुष
सुरतगोपनं छद्मना कृतमिति॥ अत्र व्याजोक्तिरलंकारः। व्याजो
क्तिः शंकमानस्य छद्मना गोपनं मतमिति। उंदुरुर्मूषकोऽप्याखुरि
त्यमरः। नखोऽस्त्री नखरोऽस्त्रियामित्यमरः॥ शार्दूलविक्रीडितं वृत्तं २०

र०टी०

विदग्धाद्विविधाद्विप्रकारा ।। वाग्विदग्धाक्रियाविदग्धाभेदेन ।। यथेति ।
तत्रवाग्विदग्धामुदाहरति । निबिडनमेति । एतत्क्वापिसंकेतमुप
दिशंतीत्याह । हेपथिकअघतीव्रेसवितरिसूर्येसति ।। मध्याह्नि
त्यर्थः । तत्रतस्मिन्पूर्वान्— निइत्यर्थः । सरितटेनदीतीरेनिवासो
सतिः समुचितोयोग्यः । किंभूतेसरितटेविडतमे । अतिशयेननि
निविडाः निविडतमाः येनमालातमालवृक्षाः तन्मल्लेतअवलं
बतेइतिमल्लिन्यः मलमल्लाधारणे । ताश्चताः वल्लयश्चलताश्च
मल्लीप्रभेदास्तेषांराजयः पंक्तयः । श्रेणीलेयास्तुराजयइत्यमरः ।
ताभिः विराजित उपकंठः समीपप्रदेशोयस्यतस्मिन् । निविडत
मतमालमल्लवल्लीविचंकिलराजेविराजितोककंटे ।। अथच
हेविराजितउपकंटस्यसमीपेअर्थात्ममवक्षस्थलेतवनिवासो
योग्यइतिवाग्विदग्धत्वंसूचितं । अथास्मिन्पक्षेराज्यतंतपदं ।। रा राम
जनेइतिराट् । क्विप्तस्मिन् । स्मृतोविचकिलोमल्लीप्रभेदेमद

१५

28

नेपि चेतिविश्वः। पुष्पिताग्रावृत्तं २१ क्रियाविदग्धामुदाहरति।
दासायेति॥ भवननाथेगृहस्वामिनिदासायसेवकायबदरीवृक्ष
विशेषब्भपनेतुछेत्तुमादिशतिसतिआज्ञापितवतिसतीत्यर्थः।
कर्कंधूर्बदलीकोलीकोलंकुवलफेनिलेइत्यमरः। हरिणाक्षीचपलने
त्रा॥ संकेतवियोगताइतिभावः। हेमतेरितोतत्रआनीय॥ अस्याःप्र
त तिशीलत्वादितिभावः। ययासितलेकुठारंविनिक्षिपति। गोपनीयमि
त्यर्थः। एतेनक्रिययाविदग्धं॥ अत्रकुठारगोपनेनवस्तुनास्वचौर्य
रतवसंकेतनिकेतगोपनरूपवस्तुध्वनिः। द्वयोः कुठारस्वधितिरित्य
मरः। आर्याभेदउपगीतंछंदः। तल्लक्षणं। आर्यापरार्द्धतुल्येदलद्व
येप्राहुरुपगीतिः २२ लक्षितामुदाहरति॥ यन्नकृतमिति। कापिनायि
कासखींवदति॥ यन्नकृतं अनुष्ठितंतन्नभूतंजातमेवेत्यर्थः। जातस्यब
कृसहस्रेणाप्यनिवर्त्तितादितिभावः। यन्नभूयात्तद्दूराचरणस्याव
श्यंभावित्वादितिभावः। तदपिअरिष्टंभूयात्सम्यकृतयास्वीकृतइ
त्यर्थः॥ वाअथवा। यन्नभवतितन्नभवतुनविलंबितमित्यर्थः। तव

२०टी०

गोपनायासगोपनविषयकप्रयत्नविफलोनिःफलइत्यर्थः।लक्षि
तत्वादितिभावः। २२ कुलटामुदाहरन्नाह॥ एतइति॥काचित्कु
लटावदति।अंभोधराःमेघावारिकणान्जलबिंदून्किरंतिक्षि
पंति।तदयुक्तमित्याह।पतीन्पुरुषान्नवर्षंति।अतोनुपयो
गिनइतिभावः।किंचशैलाःपर्वताःशाद्वलंहरिततृणंउद्वमंति।
प्रगटयंति।शिलोच्चयादकारुदितत्वादितिभावः।यतःएते
पुनः।नायकान्राजन्ननसृजंति।अपिचतरवःवृक्षाःपरोप
कारिणापित्रैलोक्येष्वपिलोकेष्वित्यर्थः।फलानिसुवते।उत्पा
दयंति।अस्मद्भाग्यविपर्ययेनकल्पवृक्षादयोपिअकारुणिका
जाताइतिभावः।यतःजनान्राजान्आरंभेतेनैवनवोत्पा राम
दयंतीत्यर्थः।अतएवहेधातःहेब्रह्मन्त्वयास्वसृजाकुलटा
हेतोःस्वैरिणपार्थेकिंकृतंनकिंचिदपिकृतमित्यर्थः।पर्णाविरल
प्रवालत्वादितिभावः।अतःकांतरंयथास्यात्तथाआलयामि

१५

30

दीनोपालंभवादामीत्यर्थः २८ शार्दूलविक्रीडितं वृत्तं ॥ अनुशय
नामुदाहरति ॥ सापिचेष्टाविशेषैसात्रिप्रकारेत्याह ॥ वर्त्तमानस्था
नेसाद्भिना ॥ प्रत्येकं एकोएकांप्रतीतिप्रत्येकं उदाहरणानि अनुक्र
मेणतिसृणामपित्यर्थः । तत्रवर्त्तमानस्थानानुविघटनेनअनु
शयामुदाहरन्नाह ॥ समुपागतवतीति । शिवृशिवतिखेदे ॥ सुदृशः
सोभननयनायाः कपालपालीगंडस्थली तालीदलस्यतालवृक्ष
स्यद्युतिंपाडुरं । कांतिशोभांलभेप्राप्तवति ॥ संकेतस्थानविघटने
विषादेनेतिभाव ः । क्वसति । लवंगलतिकायाः संकेतरूपायाः
लतवल्लतिकास्यनुकंपायाः कानूपभपातनदीनेनेवधस्यत
शतियुक्तं । तस्यामनुकंपायामार्द्रत्वं तस्यानिपतितानिपत्राणियस्मि
नूबैत्रेमासिस्वसंकेतनाशकेसमुपागतवतिसतिप्राप्तवतीतिस
ति । आर्य्याभेदगितिछंदः । तल्लक्षणं ॥ आर्याप्रथमार्द्धसमय
स्यामपरार्द्धमाहनागीमिति २९ भाविस्थानाभावशंकया । अनुश

31

यानामुदाहरति ॥ निद्रालुकेकीति ॥ काचित्स्त्रीस्वसखींचौर्य्यरत
संकेतप्राप्तिमपश्य — मोश्वासयंतीवदति । हेतान्विहह्कृशांगिन
खिद्यस्वखेदनप्राप्नुहि ॥ तत्रापिप्रियवसतौकियतिवाकियत्प
रिमाणमस्यकियात् तस्मिन्नकियतिवनानिनसंतिकिंतुवहूनि
भवंतीत्यर्थः । अतः प्रियतमस्यगृहंप्रयाहिप्राप्नुहिकिंभूतानि
वनानि । निद्रालवोनिद्रातीक्ष्णायेकेकिनः । प्रशंसायामितिभा
वः । प्रशस्ताः केकायाणीयेषांतवर्हिसाःस्तेषांमिथुनानि । स्त्रीपु
सरूपाणियेषुतानि । एतेनजनसंचरणराहित्यं । केकीमनेनघ
नस्यमेघोदयस्यध्वन्यते । पुनः कपोतानांपक्षिविशेषाणांपोताः
वालकाः तैर्व्याधूताः कंपिताः नूतनाममहीरुहाणांवृक्षाणं ।
पल्लवाः येषुतानि । एतैर्विशेषणैर्जारविलासिन्याश्चंचल राम
संभोगायाः नायिकाया कटंकूजनाघटपल्लवादिविधूननंध्व
न्यते व्याजोक्तिरलंकारः । वसंततिलकाछंदः २५ स्वैनंआत्म

नाआत्मनाअनधिष्ठियत्संकेतस्यस्थलंतास्मिन्तस्यगमनेन
चातिरिक्ताअनुशयानाआह॥कर्णकल्पितेति।राधयामधुरिपुः
श्रीविष्णोनिरीक्ष्यते।दृश्यते।किंभूतया।निःपतंतोगलंतोनयन
भ्यांवारिधारायस्यास्तया।कृतसंकेतेनागतमयानागतमितिवि
षादेनेतिभावः।कथंभूतामधुरिपुः।कर्णकल्पितारचिताया
संकेतेनागतमयानागतमितिविषादेनेतिभावः।कथंभूतामधु
रिपुः।कर्ण रसालमंजरी।अहमतस्त्वंनागतेति।राधायाः वि
श्वासार्थंसांकेतकाभ्रमंजरीतयापिंजरीहरितालोकृतकपोल
मंडलंगंडस्थलंयस्यसः।पिंजरपीतनतालंआलंवहरिताल
कमित्यमरः २७ रथोद्धताछंदः॥तल्लक्षणं॥रात्परैर्नरलगैरथो
द्धता॥मुदितायथातथोदाहरति॥गोष्ठेति।काचिस्वगृहेवासयितु
इच्छंतोपथिकंवदति॥पतिःभर्त्तागोष्ठेषुतिष्ठति।अहर्निशमिति
भावः।ननंदाभर्त्तृभगिनीवधिरा।चपुनःयातुःभर्तृभ्रातृभार्यायाः
नेत्रद्वयस्यपाटवंपटीभावःपाटवं।आरोग्यमितियावत्॥नास्तिआ

33

नेत्यर्थः। इयं अमुनाप्रकारेणपथिकंप्रतिसंकेतोपगर्भसखी
वचनंनिशम्यस्तुलाजणीनायिकाकेचकंभयाः सीम्निप्रदेशेरो
माचाएवकंचुकंटदंवितंऊर्द्धगतंआनतानमया ऽयंपांथउप
भोग्यानेइत्सानांदितस्मारयतिस्मेत्यर्थः २८ वसंततिलकाछंदः।
परकीयायाप्रदर्श्यकन्यकाउदाहरन्नाह। ययेति। किंचिदिति। नृ
पकन्यकाराजकन्यकासुहृतिनपुल्पवंतंसव्याजंयथास्यात
थाकिमपि। व्याजमाश्रितेत्यर्थः। धाष्टर्याभावादितिभावः। आ
लोकतेकामाधीनतयाविलोकयतीत्यर्थः॥ किंभूताराजकन्या।
स्फुरती अंगुलीयकानांमुद्रिकानांद्युतिकानिर्यस्यतयाअंगुल्या
गंडस्यकपोलस्यकंडूयनंकुर्वाणी। कथंविलोकनमित्याह।
किंचिंताातियकरणादितिभावः। हरत्यासिहारलतायस्यांक्रि राम
यायांतन्यथास्यात्। पुनःसरलेअकुटिलत्वसाभिलाषाव
लोकनेनेतिभावः। भ्रूवल्यो भ्रूलतयत्रक्रियायांतथाकिंच।

१८

साचिनिर्यंकुह्मितंयथास्यात्। अन्यापदेशेनेतिभावः। किंच।
भ्रांतेभ्रांतानिलोचनयोर्नेत्रयोः [illegible] द्युतिः कांतिःयत्रक्रियायांय
थान्तथामन्नेत्रयथानागच्छत्वयमितिसीत्सपुनः भुजायांपर्यु
स्तपतितंकपोलसलंयत्रक्रियायांयथास्यात्तथास्यात्। कामवशतया
कपोलकंडूयनादितिभावः भुजावगुद्वींमितिमाघे। अतस्त्रीलिं
गेपिभुजाशब्दः २१ शार्दूलविक्रीडितं। एवंनिरू[illegible]प्यसामान्यवनि
तांदर्शयति। वित्तमात्रेति। वित्तमात्रोपाधिकः सकलपुरुषाभि
लाषोयस्यासावितोपाधिके त्यक्तेपरकीयायामतिव्याप्तिः। तस्याः
कदाचिद्वितोपाधिप्रक्तित्वात्। अतोमात्रेति। यद्येवंइहव्याप्ति
रिति।शंशमानआहनन्विति।। अग्निमित्रोक्षितिपत्तौराजनिअनुर
रक्तायाऐरावत्यांवेश्यायां। अव्याप्तिलक्षणस्याप्रवर्त्तनंइत्यर्थः।
नत्रतस्यावित्तमात्रोपाधेरभावात्।। रतिचेत्। उच्यतइतिशेषः।
मैवंएवंनावक्तव्यं। सापिऐरावतीकाश्मीरहीरादिदातरीमहाराजे

35

अनुरक्तानतुमहर्षौतेनअवगम्यते।तत्रापितस्यामपिवित्तमात्रो
पाधिरिति॥सामान्यवनितायथातथोदाहरति॥ दृष्ट्वेति।कुरंगीद
शामृगनेत्रायाःवक्षोजौस्तनौपरस्परंआश्लेषमिवआलिंगनमिव
तनुःकुरूतेत्यर्थः।किंकृत्वा।प्रांगणसंन्निधौचत्वरसमीपवहुध
नंयस्यतं।दातारंअभ्यागतंदृष्ट्वातविलोक्यकिंच।कुंतलःकुंतलाः
कचाःसंतिअस्मिन्संयत्वेनेतिकुंतलोधम्मिलः।आशीर्दिभ्यो
नप्रत्ययः।मालयामिषात्व्याजात्आनंदोहर्षः।धनप्राप्तेति
भावः।तेनअस्त्रुपर्यासिअस्त्रुविंदूनिवविसर्जंति।आनंदाश्रू
णास्त्रवलात्।पुष्पसाम्यंकिंचिद्दृष्ट्वेधनागमंधनप्राप्तिकथ
यितुंकर्णांतिकंकर्णसमीपंगच्छति।धनागमानंदादितिभावः राम
३० शार्दूलविक्रीडितवृत्तं॥एवंस्वीयापरकीयासामान्यवनिता
स्त्रिभेदानिरूप्यान्यदपिनिरूपयति॥एताःपूर्वोक्ताअन्यसंभोग
दुःखितावक्रोक्तिगर्विताःमानवतामानयुक्ताश्चस्त्रः।अन्यसं

भोगदुःखितायथा।हंदूतीति।हेद्दूतिहेमत्सरेखिन्ने।दुदु — उ
पतापइतिधातोः दूयतेइतिसुसमात्वंकुंजंनिरगाः।मत्प्रियविर
हदुःखतयादुःखितमात्मानंसुखयितुंकुंजप्रदेशंगतवतीत्यर्थः।
तुपुनःपापीयसोऽविप्रकारिणोगृहंना।तदानयनंतुमत्सुखा
र्थी।सचान्ययासक्तइतिकिंतद्गृहगमनेनेतिभावः।।किमिदंयद
सीतिचेत्तत्राह।।अन्यथानैवंचेत्।देहेअंगेकिंसुकाभरणं
कथंदृश्यते।सर्वंमत्प्रियंत्वयासंपादितमितिसोपहासं।।प्रिय
भुक्ताङ्गीतिनखक्षतादिदर्शनेननायिकायाःदुःखागमप्रतीती
र्ध्वन्यते।किंसुकचिन्हेनकुंजगमनानुमानमित्यनुमानालंका
रः।अनुमानंतुकार्यादिकारणावधारणमिति।सचवक्रोक्त्या
व्याजस्कस्याचनखक्षतेषुकिंसुकापन्नएव।।व्याजस्कातिमुखे
निंदास्कातिर्वाकस्तुष्टुवान्यथा।।२१ वक्रोक्तिगर्वितायथा।द्विवि

ध्याद्विप्रकारा ॥ द्वैविध्यंदर्शयति । प्रेमगर्वितासौंदर्यगर्विता
च । यथेति । प्रेममर्वितोदाहरणमाह ॥ वपुषिति । कश्चिदात्मान
मीधिकमन्वानुः सखींवदति । हे सखि । अत्रनवेतिपदमुभयत्र
पीज्यं । काकाक्षिन्यायेन धन्यासीत्यर्थः । किंत्रवी । नकिंचित्हीन
वक्तुंशक्यतइत्यर्थः । नतथाहइत्याह ॥ येकांतविभूषणानिन
कलयतिमधारयति । किंभूतः नतुनयनांतरात्भीरुः । ननु
र्ममनयनांतरालव्यवधायकंतेनभीरुः भूषायांमदंगांतरा
यंजीवतीत्यर्थः । धन्यतमेतिस्वाधिक्यकथनान्यव्यतिरेकालं
कारः । उक्तंच ॥ उपमानाद्यदन्यस्यव्यतिरेकः सउच्यते । इति ३२
पुष्पिताग्रावृत्तं ॥ सौंदर्यगर्वितातथेतितांउदाहरति ॥ कलय राम
तीति ॥ काचित्सखींवदती । हेसखिकांतेप्रेयसिकिंमाचरामि
किंकरोमितत्कथय । उपदिशेत्यर्थः । तत्रतस्मिन्कांतेसहि

स्पृशतैवतादृश्याक्यसहनशीलत्वमेवदोषाः समजनी। सेजातः।
किंभूतेकांते। मेघक्ष्णः कमलोपमानेकमलतुल्येकलयति कथ
यतिसतीत्यर्थः। पुनः मेवाच्चिसुधारसस्यअमृतद्रव्यस्यसाम्यंसमा
नांप्रथयतिप्रस्थापयतीत्यर्थः ३२ पुष्पिताग्रावृत्तं ॥ मानवतीय
थेतितामुदाहरति। प्रियापराधंसूचयतीतिसूचिकाएवंभूता।
चेष्टामानः। सचलघुर्मध्यमोगुरुश्चेत्साधुदाहरणायर्यंतस्यष्टं।
उत्कृष्टरौद्ररसोपसप्रायसोभवत्त्रेधाकामिनीप्रियप्रति॥ अवेक्ष
दोषमेतस्यगरीयान्मध्यमोलघुरिति॥ अपरस्त्रीदर्शनादिज
न्मायथेतितामुदाहरति। स्वेदांबुभिरिति॥ काचित्सखीवदति॥
हेशातोदरि शातंकृशंउदरयस्यासातस्याः संबोधनशातोद
रिप्रियकांतेअपरानायिकाविलोक्यतिसति। नवविलोकमात्रं
किंतुभावयसीतिसातित्तवमानः कुकस्मिन्प्रदेशपदंचरणं
दास्यतितत्सदस्थानंनविद्मः नजानीमः। अतएव एतेदंगके।

र० टी०

घनप्रदेशः स्वेदांबुभिः पिछलं व्याप्तं क्वचन प्रदेशे कंटकितं संजातकं
टकं उभयत्रापि अपकर्षोदयन स्वेदरोमांचं वपुः तत्वमिति भावः।
चकास्ति शोभते। किमिव। हि यस्मात् मधुराणां मंडनं नाकृतीनां।
इति भावः। स्वेदांबुभिः क्वचन पिछलमंगभूमाविसर्पपारोसमं
जसत्वात् २५ वसंततिलकाछंदः गोत्रस्खलनादिजन्मा यथा
तथोदाहरति। यूज्ञात्रेति॥ हतविचयकोत्रस्खलेनंसपत्नीना।
मोच्चारणमित्यर्थः। तत्रोच्चारणे यदभिमानमन्यते। त्वयेति
भावः। तर्हि रोमावलिः रोमश्रेणी सैव व्यालः सर्पः तस्य संस्पर्श
तत्सीत्कारं शपथं कारयत तद्दोषपरिहाराय शापथं कुर्वे तं मां प्रे
रयेत्यर्थः ३५ अनुष्टुप्छंदः॥ अपरस्त्रीसंगमादिजन्मा यथा राम
तथोदाहरति। दयितेति॥ सुदृशो नायिकायाः नयनस्य सेक
स्येव प्रक्षेपण संधानादेकत्वकोणभासाप्रांतकांत्या श्रुतिमुक्ताः
कर्णावतंसीकृतमुक्ताः फालतानि शिखरोपमादाडिमी बीजतुल्याः

२०

वभुबुः।जाताइत्यर्थः।सापराधेप्रेयसिक्रोधेनेतिभावः।किंकृत्वा सप
न्याचरणालक्तकेनपिंजरपीतवर्णंदयितस्यभालदेशंनिक्ष्यतिर्यग
वलोकेत्यर्थः।औपछंदसिकंवृतं।तल्लक्षणं।षड्विषमेष्टौसमेकाला
स्तैश्चसमेस्परणेनिरंतराः।नसमात्रपराश्रिताः।केलाः वैलालीयतेक
लौतत्रैवांतेधिकेरगोस्यात्।औपछंदसिकंकवींद्रपद्य।तत्रैवैतालीये
प्रतिपादंअंतेचिंकेगुरोस्युरित्यर्थः।२८ प्रासंगिकतयाएसाभेदांतरा
णिनिरूपयति॥एताःषोडशेति।त्रयोदशविधास्वीयायथामध्याप्रगल्भ
योः।प्रत्येकंधीरादिभेदःषट्पुनः।एवंद्वादश।मुग्धात्वेकैवेतिमिलित
त्वात्त्रयोदशपरकीयाद्विविधा॥एकावेश्येतिषोडश।अष्टावस्थाभिः
प्रत्येकं एकंप्रतिअष्टविधाअष्टौप्रकाराः तामवस्थामाह॥प्रोषितेति।
प्रोषितोदेशांतरगतोभर्तायस्यासाप्रोषितभर्तृका॥खंडितामाह॥प्र
न्यासक्तत्वेनपत्याविमुक्तेत्यर्थः।कलहांतरितामाह॥कलहेनअंतरिता
कालहांतरितेत्यर्थः।विप्रलब्धामाह।विप्रलब्धेनविसंवादनयुताविम
नस्केत्यर्थः।उत्काउत्कंठितेत्यर्थः।वासकसज्जावासएववासकः वारस्त

त्रशय्यासज्जपीतितल्पादिकंसा।स्वाधीनेति।स्वाधीनःपतिर्यस्या
सास्वयमभिसरतिअभिसारयतिवा।अतएवगणणात्स्पष्टं।ता
सांनायिकानांउत्तमादिगणनयाशतत्रयचतुरसीतिअधिकयुत
भेदाःभवंति।यथाचउक्तंहित्रयोदशविधयः।स्वीयाद्विविधाच
यगणाएकावेश्याप्राणाचष्टावस्थाभेदनोमताः।पुनश्चैतात्रिवि
धासर्वाउत्तमाधममध्यमाः।इत्थंशतेत्रयंतासामशीतिश्चतुर
शीतिनिराकरणायमतमनुवेदंति।एतासांअनंतरंगणितान्
दिव्यादिव्योभयप्रअर्जुनादयःइत्थंतंस्पष्टं॥यद्यपीति।मुग्धाया
नायिकायायथा।धीराभेदस्याभावः।तथापिधीरादिप्रकार
तयाप्रज्ञासामग्रीतस्याभावात्॥यथाअष्टविधत्वाभावोभ
वितुमर्हतियोग्योभवति॥तथापीति।प्राचीनानांकवींद्राणां
लेखनस्यअनुरोधाग्रहणेनवोढालज्जाभयपराधीनरूपासु राम
धांआलंब्याप्रिस।एतेभेदाः।प्रोषितभर्तृकादयःअवगंतव्याः
ज्ञातव्याः।तत्रप्रोषितभर्तृकांदर्शयति।देशांतरगतरति। २१

देशांतरपदे॰ नोत्कादिष्वतिव्याप्तिं निराकरोति। उत्केत्यादिस्पष्टं।
अस्याः प्रोषितभर्तृकायाः चेष्टा दशाऽवस्था अभिलषचिंतादयो।
वक्ष्यमाणाः। मुग्धाप्रोषितभर्तृकामुदाहरति। दुःखमिति।। अंबु
जमुखी मुग्धा यत्तनूरसव्ययं। यतो हेतोः संतापसह तनु हेतुं
चेतोभवः कामो वेद जानाति हृच्छयास्यादिति भावः। नान्यइत्यर्थः।
संतापमेवाह दीर्घतरं अतिशयेन दीर्घं बहुलमित्यर्थः। दुःखं वहत्यपि
सखीवर्गाय सखीसमूहाय। लज्जयेति सर्वत्र संबंधः। नो भाषते
न कथयतीत्यर्थः। पुरा शैवालैः जलैनिलिभिस्तृणविशेषैः शयनं
शय्यां स्रजमपि न वासते न निद्राति पुनः कंठगद्गदवाचं स्खलित
गिरं सवाष्पत्वादिति भावः। अंबानि गच्छति प्राप्नोतीत्यर्थः। दृशो
नेत्रयोः वाष्पोदकं न धत्ते न दधतीति विशेषोक्तिरलंकारः। २७।।
शार्दूलविक्रीडितं वृत्तं।। मध्याप्रोषितभर्तृकायथा। वासइति। का
चित्सखी तां वदति। हे सखि वपुषः वासो वसनं तदेव श्लथातिसूक्ष्मे
ति भावः। हस्तस्य वलयकंकणं तदेवायामीत्यर्थः। न पुनः जघनस्य

वराम्बेष्टापरिमितत्वादिति भावः। कांचित्सैवा वाचालवटुभाषणोये
भंगास्तुषुसुभगेसुरभौ वसंतेस्तनिअद्यसमस्तवासइसादितेतवाधि
कंभवति॥ विरहवेदनयाकृशत्वादिति भावः। किंनिदानं किंकारणमि
ति। आलजाटचौवटुभाभाषणेतिसूत्रेणकुत्सितार्थेआलचप्रत्ययः।
अत्रवेटिविषयत्वेनासंघटनवाक्कुत्सितत्वं। अत्रनर्मस्फोटालंकारः।
नर्मस्फोटास्तुभावानांसूचितार्थरसोल्पवैटिति। पश्चान्नितंबस्त्रीकुच्या
कुंचितजघनपुरः। वसंतपुष्पसमयसुरभिरिसमरः॥ ३८ वसंत
तिलकावृत्तं॥ प्रोढाप्रोषितभर्तृकायथालामुदाहरति। मालेति॥
काचित्सखीप्रोष्ठप्रियरहितांसखीवीक्ष्यवदति। सुषुवानायिका
याः बालांबुजदलमयीबालानीकोमलानिप्राचुर्येस्यांसामालात
थामौक्तिकमुक्तानिर्मिताहारयष्टिः हारलतातथाकांचीक्षुद्रघंटि राम
कायीविषदुःखहारिणीहरोकृच्छोसभवति। प्रकर्षेणकर्मगुणादिसं
पत्त्याभवतीति॥ प्रभवन्नुतास्मिन्नयातेगच्छतिप्रस्थानकृतवती

त्यर्थः ।अवस्थितत्वेनकूलगामैनैवकमलदलमालायाः मुक्ताहारस्य
चेसंततायाकांच्याहूतत्वात् ।प्रस्थानमिति ।।अन्यत्किमपिआश्चर्यंद्र
मः ।अहहेतिखेदे ।धमनीनाडीवर्त्ततेवानवाइतिसातुवाहोर्वलय
यान्निर्मूलंहस्तंप्रयातिगच्छति ।अत्रप्रकटमेवप्रागल्भ्यं ।नाडीतुधम
निःशिरेत्यमरः ।मंदाक्रांतावृत्तं ।।मंदाक्रांतांबुधिरसनगैर्मोभनौ
युग्म ३१ परकीयाप्रोषितभर्तृकामुदाहरति ।।श्वश्रूरिति ।श्वश्रू
पतिमाताप्रभदलंददाति । कौतूहलेनेतिभावः । तदपिफलंतयाभ्रू
भंगसूचनेनगृह्यतेस्वीक्रियते ।। चपुनःसव्यस्तहस्तेनमर्मरशंकयाशु
ष्कपर्णध्वनिशंकयास्पर्शमात्रेणैवशुष्कास्मिन्प्रदेशोममविरह
तापंमाज्ञासीदितिशंकयेत्यर्थः ।पाणिनासंस्पृश्यतेपिचकुरंगीदृशा ।
कुरंगीमृगीतद्वद्दृक्यस्यास्तया ।तयाभीसाचकितदृशेतिभावः ।
भर्तुर्भ्रातृभार्यायाः वाचिविषयेसुहृज्जनस्यसखीगणस्यवचसाप्र
त्युत्तरंप्रतिवचनंदीयते ।। किंतुकुलवधोचितस्तद्वक्रूरः ।श्वासोनुत्सुज्य

२० टी०

नेपूर्ववत् शंकयति भावः ।। अत्र प्रच्छन्नकामित्वं प्रकटमेव ४० शार्दूलविक्री
डितं वृत्तं ।। सामान्यवनिताप्रोषितभर्तृकाय थेस्कल्काउहरति ।। द्वारदेशे उ
पविष्टा पुरे योषित् वेश्या इति हे ता अक्ष्णोः नेत्रयोः मरिचनिचयं समूहं
न्यस्यति क्षिप्य बाष्पोदकबिंदून् जलकणान् विसृजति । प्रकटयति । रु
तीति किं । कांतकामी अंतर्मनसि स्वस्येत्यर्थः । विरहेन विदितं ज्ञानं । मम
मप्रेमस्नेहं विज्ञाय स्वविषयकं यत्प्रेम ज्ञातवेत्यर्थः । तस्मात् देशा
त् ए स आगत्य पुनरपि पूर्ववत् तद्वादास्यं दास्यति । अत्रापह्नुतिर
लंकारः । मालिनी छंदः ।। ४१ ।। अथ खंडितां दर्शयति ।। अन्योपभोगे
तिस्पष्टं । प्रातरागच्छति । कालस्याप्युपलक्षणं ।। ननु नियमकामि
त्यर्थः । अस्याः खंडितायाः चेष्टाव्यापार अस्फुटालापेतिस्पष्टं ।
मुग्धाखंडिता यथा तथेति तामुदाहरति ।। वक्ष्यति ।। प्राणेशः पतिः
नकोढसुदृशः नवोढा बाला सा सुदृक् चतस्याः नायिकायाः नयनं नेत्रं पा
णिनापि दधे आदयत् ।। किंभूतायाः सुदृशः वक्षः उरःस्थलकलशांकित
कंठचिन्हितं किमुत किमुत कैरुधं किमपि चिन्हादिकं स्पष्टं रुद्धं सा ।

राम

२३

46

वास्तवोनान्यमपिकास्तनाभोगचिन्हेमुग्धत्वास्वच्छसाऽस्यर्थः॥ आर्याभेदे
उपगीतिछंदः ४२ मध्यारवंडितामुदाहरति॥ वक्षोजेति॥ बालानायि
कानात्रबालाशब्दोमुग्धापरः। बलसंभक्ताविति धातोतेनबलतसं
भजेतेधीरात्वंतत्परः। दयितस्यप्रियस्यवक्षोजचिन्हितअन्यनायि
कास्तनाचितंउरोवीक्ष्यदृष्ट्वादीर्घंअधिकंननिश्वसति॥ निघृणप्र
तिकिंचिद्दर्शनेनेतिभावः। किंचिवक्रांतजल्पातिपूर्ववएवभावः॥ किं
तुजलेनप्रातमेववदनंपरिमार्जयंतीविलोचनानिअश्रूणितिरोदधा
तिस्थापयतिमद्दृक्तद्दर्शनेनायंविप्रियकृद्दुष्टबुद्धिश्चोनभवेदितिचातु
र्येनेतिभावः॥ अपन्हुतिरलंकारः॥ ४३॥ वसंततिलकावृत्तं॥ प्रौढा
रवंडितायथेसुक्त्वाउदाहरति॥ मामुद्वीक्ष्येति॥ कापिनायिकासरवीं
प्रतिवदति॥ अंगनानायिकाप्रातःप्रभातेवारतलात्। ल्यब्लोपेपंच
मी। करतलेस्थापयित्वास्वस्यैसर्थः॥ मंगलंमंगलसूचकंआपत्स्मर
णादितिभावः॥ आदर्शंमुकुरंआदर्शयतु॥ किंवक्तव्यंत्वमेववचिन्हा

र०टी०

न्यबलोक्यस्वापराधंविगणय्येतिदर्शयतिस्मेत्यर्थः।किंभूताअंगना॥विपक्ष्मल
दृशः विपक्षाःसपत्नीचासौपक्ष्मलदृक्चतस्याः प्रशस्तानिपक्ष्माणियस्याःसा
सिध्मादिभ्यश्चेतिलच्।तस्यपदांबुजालक्तकैः आलिप्तं आननंमुखंयस्याःसा।
ता।उत्तानकरणादितिभावः।उद्वीक्ष्यउच्चैर्दृष्ट्वा॥आनतीकृतमुखी।नपूर्वंआ
ननंआननीकृतंमुखंययासा।विप्रियकारणेदर्शनाभावान्नरतिमितिधियेतिभा
वः।चित्रार्पितवच्चित्रलिखितेवअभवत्जातेत्यर्थः।विषादमूढयेतिभावः।
किंचरूक्षनीरसंउक्तवतीवाअथवादृशोर्गानिश्वसितेनकोष्णमवर्ष्यैः किंचिदश्रु
दृमेनकृतवती॥अत्रापिरूक्षवक्तव्याद्यभावेपूर्ववत्॥श्लोकोक्तएवभावः। ४४
शार्दूलविक्रीडितंवृत्तं॥परकीयायाःखंडितायथेतितामुदाहरति॥कांतमिति।
मृगदृशानायिकायावलयांकितकंठदेशंकांतकामिनंनिरीक्ष्यपरकीया
प्रच्छन्नकामित्वादितिभावः।परुषाः कठोराः।वाचोनोक्ताकिंतुतयादृती
मुखेस्खलदंबुपूराःस्खलनंअंबुपूरोम्बुबाष्पवाहोयेषुतेनयनांतपाताः
दूरात्तानिदधिरे।विस्मिताः स्वदूतस्यफलवैचित्र्यमवलोकयेतिधियेति

२४

48

भावः ॥४५ वसंततिलकछंदः । सामान्यवनिताखंडितायथेतितामुदाह
रति । उरस्तवेति ॥ वारस्त्रियावेश्येसमरः । इतीतिकितवरदंडुरः पयोध
रांकितमन्यनायिकास्तनचिन्हितं । अतः मेकृतःक्षमातितोहेतोः यत्
रापूर्वंअंगीकृतवसुद्रव्यं ॥ ततमपिविषयनिधीयतांदीयतामित्यर्थः ॥६॥
पृथ्वीछंदः ॥ कलहांतरितामुदाहरति । पतिमवमन्यतिस्पष्टं ॥ अस्या
कलहांतरितायाश्चेष्टा । भ्रांतिसादि । भ्रांतिर्मिथ्यामतिभ्रमेसरमः । मो
हःइंद्रियवैकल्यंस्पष्टमन्यत् । मुग्धाकलहांतरितायथेत्युदाहरति ।
अनुनयतीति । नवोढामुग्धालज्जामानयतेसालज्जमानामितियो
ज्यकलहेनावमानितमित्यर्थः । नानुनयनिसखीजनायापिकिंचि
तूनकोर्तयतिनकथयति । परंतुमलयानिलेप्रसरतिसति । चिरायचि
रकालंमन्युज्ञानरहितंअंनः अंतःकरणंवहति ॥ विरहदाहकलयादक्षि
णेनायिकाविषादत्वेनेनिभावः ४७ पुष्पिताग्राछंदः ॥ मध्याकलहां
तरितायथेत्युदाहरति । विरमतीति ॥ इत्यंचिंतयतिभावः । अधोनीचे
मुखंयस्याःसानायिकाकलहपत्यासहेतिभावः । सखिभ्यःलपितुंत्रे

२०टी०

नालपिंतुंसमाचकोक्ष ।धृर्षाध्युष्याभ्यांकथयितुंवैवदिसर्थः ।इतितीकिं ।त्वे
तः कथनंविनानविरमति ।नशाम्यतीत्यर्थः ।निवेद्यसुखदुःखंसुखीनां
भवतीतिपुनः कंपनेसतिकापिलज्जासमुपैतिअथवाध्यीढकुंनशक्यत
इत्यर्थः ।।शंशयालंकारः ।पुष्पिताग्राछंदः ।।४८।। अथोढाकलहांतरिता
यथेसुदाहरति ।।अकरोरिति ।।कापिसखीनायिकांप्रतिवदति ।हेरस
ले ।यद्वाकुधारससले कंपदंकोपसंज्ञइत्यर्थः ।यद्वारसलेकुधाकोपेनेति
सर्वत्रनयोरन्वयं ।नेत्रशोणिमाननेत्रयोरक्तत्वंकिमुअकरोः ।रुषाकृत
वतीत्यर्थः ।वापुनः ।करपद्मेनतर्जनंभर्त्सनंवहिः निःसरणरूपंकिं
अकृषीः ।किंकृतवतीत्यर्थः ।प्रतिकालनकिंटिनाचरितमिकोपवेरि
त्रयंयुक्तं ।।किंचकलहंकिंअथाःकृतवती ।यद्वानायिकानेत्रकरपद्मस
संक्रियसपापमत्रवदति ।रसज्ञाजिह्वाशेषंपूर्ववत् ।युक्तमेतन्न ।हितमिति
देवेनदृष्टाहला ।हितमर्थनदति ।नजानाति ४९ परकीयाकलहांतरि
तायथेतितामुदाहरति ।।भर्तुरितिसखीवदति ।हतधियामयाक्रोधा

३

राम

२८

स्त्वअवधीरितोऽधिकं कृतः भोमातः विधिदैवीवलीयान्। तस्यैव वरदं विलसि
तं न मे पराधरद्दत्यर्थः। सकः न्यस्य भर्तुः श्वशुरादिरस योषकस्य कृते रसव्यय॥
यंनिमित्तमित्यर्थः॥ गुरुः श्वसुरादिः लघुरभूत्। मयागणीयोपाति इत्यर्थः।
पुनः सहचरी समीपवर्तिनी सखी तस्यानीतिः दूरतः कृता पुनः पुनस्त्र
पाल्लज्जात्तृणवत् तृणेन तुल्यं तृणवत् निर्मुक्ता अतिशयेन त्यक्ता इत्यर्थः।
पुनः सहचरी समीपवर्तिनी सा सखी तस्यै इति स्रोतः प्रवाहोऽस्यास्ती
ति गंभीरनीरादिरित्यर्थः। विटुवसरिचितासंकेतवर्तिन्यागत्य साम
यविटुनातुल्यं अभ्यस्ता इत्यर्थः। अत्र नर्मस्फोटालंकारः। समज्यापरि
षद्गोष्ठी॥ स्रोतस्वती द्वीपवती स्रवंती निम्नगापगेत्यमरः॥१०॥ शार्दू
लविक्रीडितं वृत्तं॥ सामान्यवनिताकल्हांतरिता यथेत्युदाहरति। यसं
केरहेति। हे सखि यानायिका तत्सर्वं ससार्यं अकरोत्॥ तस्मिन्नादृशे
प्रकोपः अभिशयितकोपः कृतः मां धिक्। अहह नि घेत्यर्थः॥ ममजीव
धारणं प्राणधारणं धिक् निंद्यं अलनुकामं धिक्। येनेवं भूतं तनुत्वं तस्य यु

51

त्तमिति भावः ।चेष्टितंकदाचित्क ।तदितिकिंयत्तमेमतिसर्वत्रसंबंधः ।
पाणिकमलंपंकेरुहलक्ष्मपंकेरुहस्यकमलस्यलक्ष्मचिन्हंयस्मिन्
तत् ।यत्सौभाग्यालयेजन्मकुंडलिकायांगुरुर्बृहस्पतिः वापुनः वेधसा ।
ब्रह्मणाललाटफलकेयत्सौभाग्याक्षरन्यस्तंलिखितं ।सर्वेषांभाग्य
सूचकत्वात् ।द्रव्यागमत्वंध्वनितं ।शार्दूलविक्रीडितंवृत्तं ५१
विप्रलब्धांप्रदर्शयति ।।संकेतनिकेतनमित्यादिस्पष्टं ।।अस्याविप्र
लब्धायाश्चेष्टा ।।निर्वेदादयति ।तत्रनिर्वेदः स्वापमानसखीज
नेउपालंभः चिंतादयः राधस्मृतिः मूर्च्छा इंद्रियक्लैब्यं ।शेषंस्प
ष्टं ।मुग्धाविप्रलब्धायांतथैवोदाहरति ।आलीभिरिति ।सखी
भिः अनेककपटैः अनेककपटव्याजाः येषुतैः शपथैः कुंजोदरंसं
केतंकृतंकुंजमध्यंनीतयाप्रापितयाविप्रलब्धानायिकया ।त राम॰
त्कुंजोदरंशून्यंप्रियरहितंनिरीक्ष्यविक्षुभितयानप्रस्थितंनच

२६

लितं। नास्यितंप्रियागमनागमनाभ्यांव्याकुलितमित्यर्थः। किंतुन
वोढानीरजदृशा नवोढावाभैनीरजदृक्चतया। कुंजोपकंठकु
जसमीपेदृष्टयोन्यस्तापीरक्षितासाहं इत्यर्थः। किंभूता। तृषाकेन
चिन्मनोरथनतांपयोव्याकुलायेभृंगास्तेषाकदवसमूहस्तस्य
डंबरोभ्रमणरूपारमत्तस्याचमत्काराः चित्रविलासाःस्ता
न्स्पृशंतीति तत्तुल्या इत्यर्थः। निर्दर्शनालंकारः। शार्दूल
विक्रीडितवृत्तं ५२ मध्याविप्रलब्धायथेसुदाहरति। सं
केतकेलिगृहमिति। एणीदृशोमृगनेत्रायाः वचनमर्द्ध।
क्षरमेवअर्द्धाणिअक्षराणियस्मिन्नत्। अर्द्धनिकाश्येव
अर्द्ध विकाशोयस्यतत्। तांबूलमर्द्धकवलीकृतमेवतस्या
वितिक्रियासंबंधः। तद्दर्शनवैकल्याज्जडीभूतवास्थितेत्य
र्थः। किंभूता। यासंकेतकेलिगृहंत्स्संगमोप्रियेच्छयाप्राप्यत

शून्यंकांतरहितांनिरीक्ष्यनिभृतःनिश्वसितयाधरायाः।निभृ
नेमंदनिश्वसितंयस्मिंस्तथाभूतोऽधरोयस्यास्तया॥अत्रअर्द्ध
विकाशनेत्रमितिनार्द्धमुकुलादृष्टिः।तस्याआनंदाभिधानात्।
अतःशून्यादृष्टिरियंयथासमततारापुराद्रूपदृष्टिःशून्यविलोकि
नी।निःप्रकंपाधुराशून्याचिंतयादृष्टिरिष्यतइति॥६३॥व
संततिलकाछंदः।प्रौढाविप्रलब्धायथेत्युदाहरति।शून्य
मिति।तयाशुन्यंकांतरहितंकुंजगृहंनिरीक्ष्यचेभवक्रामंकु
टिलंकृरुप्रियविरहजपीडाजनकत्वात्।दृष्ट्यपिननिवर्द्दि
ताकांतानयनार्थंज्ञापितेत्यर्थः।स्मृतिश्चेके इतीतिक्लिं।शं
भोःशंकरंकल्याणभवसस्मादितिशंकरोतीतियद्द्वयसंत
स्मानासुखकारित्वेनचंद्रशेखरेत्यर्थः।तिष्ठागीतिकामममित्र

हाज्जटाभिर्वर्द्धीविरहिणांदुःखात्मकोपभवत्विति॥नातोल्पमिति
भयमितिभावः।हरतिसर्वेषांदुःखमितिहरः।श्रीकंठः श्रीशोभा
कंठेयस्यविषभक्षणात्गौरांगस्यनीलकंठलशोभैव।अतोमां
दुःखविषहरणमितिभावः।शूलीनिति।त्रिशूलेननिःशेषहं
तव्यः।स्मरत्वात्नतस्यसर्वदाहोनयुज्यतइतिभावः।विश्व
सनीयइतिभावः।शिवेति।आनंदरूपोसित्वं।यद्वाशिवागौ
रीविद्यतेअर्द्धांगत्वेनयस्यसः।अर्शादिभ्योच्प्रत्ययः।तया
पियमलनान्मामप्यानंदरूपांकुरुष्वेतिभावः ५४ शार्दूल
विक्रीडितंवृत्तं॥परकीयाविप्रलब्धायथातथोदाहरति।दृ
ष्टेति।तन्व्यातन्वंग्याःप्रियोनदृष्टःसंकेतितइतिभावः।किं
कृत्वा।धैर्य्यमेवभुंजगःसर्प्पःस्तस्यमूर्द्धिशिरसिचरणौदत्वा।
यद्वाधैर्य्यंचभुजंगश्चतयामूर्द्धिपुनःलज्जारूपांनदींउल्लंघ्य।

र०टी०

पुनः घनांधकारस्यपटलंघनंनिबिडंअंधकारंतस्यपटलैस
मूहंअंगीकृत्यसंगतयत्यर्थः। वृपुनः लज्जारेणनंदींउल्लंघ्य। पुनः
संतापेनआकुलयातयापाप्योधरेजलधरेगर्जतिसति। क्रोधे
नआक्रांतोव्याप्तोयः कृतांतस्ययमस्यमतोमहिषस्तस्यभ्रांत्या
कालमहिषोयंस्मिन् इतिभ्रमेणपरितः सर्वतोदृशोयाजितत्र
रितेमेघस्यविरहिवैरित्वात्तदवलोकनेनैवयुज्यतइतिभावः।
अतोभ्रांतिमान् अलंकारः। शार्दूलविक्रीडितवृत्तं ५५ सामा
न्ययनितांविप्रलब्धांयथेस्फुदाहरति। कपटेति। सकलरसि
कगोष्ठीनांवंचिकाअसौवारस्त्रीवेश्याकेनचित्कपटवचन
वक्रोकपटवचनानिवक्रोक्तेननवंचिताकृत्रिमालंकारद
नेनेतिभावः। इतिहेतोः रिंगतीचलंतीयेभृंगास्तएवविक्षिप्तेव रामº
क्षकषायस्यसः। कोलिकुंजः किंकचानियानिकुसुमानितेषांकौ

२८

तिछ्घनाविहसतिवेतिशेष:।उत्प्रेक्षालंकार: ५९ अथोत्कां
दर्शयति ।। संकेतस्थलमिति ।। उत्का।उत्कंठितास्यष्टमन्यन् ।। अ
वधिरिति।अवधिदिवसेअनागतप्रेयसिसतीत्यर्थ:।प्रोषित
पतिकायांअतिव्याप्तिर्ननिषेधहेतुमाह।तस्याइति।।प्रोषित
पतिकाया:भर्तुरवधिदिवसेअस्मिन्दिनेअत्रमास्यामीसव
धिकृतदिने।।भवनगमननियमइति।संकेतपदेनतद्व्यावर्त्त
नात्।भवनगमननियमस्यव्यावर्त्तमानात्।अस्या:उत्काया:
अरतिर्विषयद्वेष:अंगकृष्टि:अगमोचनकपटनज्ञादिना
क्रियाविषयकयाजस्यमोचनमन्यत।मुग्धोत्कायथेस्कदाहरति।
यन्नाद्यापीति।प्रिय:अद्यापिनसमागत:इतियावत्।अत:आ
येणवाहुल्येनपरांअन्यांस्त्रियंप्रपेदे।आप्तवान्।इत्थंचेतसि
चिंतयंत्यपिजीडयालज्जयासखीनपृच्छति।। किंचदीर्घश्वसिति

२० टी०

नदधाति।चकितंसकंपंनप्रेक्ष्यते।उभयत्रसखीभीस्येत्यर्थः।केवलं
किंचित्मानाकूपक्कोयःपलांडुःकंदविशेषःतद्वलयापांडुरारुचिः
कांतिर्यस्यास्ताकपोलस्थलनव्येविरहसंतापेनविभर्तीतिइत्य
र्थः ९७ शार्दूलवृत्तं॥मध्याकायथातथेस्कदाहरति।आनेतुमि
ति।कापिनवोढनीजरजमुखीनवडुढयत्नीरजकमलंतद्वन्मु
खयस्याः।सातथाश्रुतातव्योरव्यानेमध्यायांनवोढानुपपत्तिःइसे
चिंतनीतिशेषः।अक्ष्णोर्विषयेकर्णयस्सुवर्णकेतकेतस्यरस
स्पपरागस्यपतिनयउपघात्।व्रीडातस्यछलात्वाष्पोदकंमुंच
वति।इसंकथंप्रियसखीमहंक्षेमविशेषेनेत्यर्थः।आनेतुंनगता
किसुअथवाभुजंगात्भीतः किमुमार्गवर्तिनःसर्पात्भीतः राम०
किंजागरनरस्यर्थः।असौप्रियःप्रतिषेधवाचिप्रतिषिधावाक्
यस्यां।निषधंउन्कवसामपीत्यर्थः।अन्यथागममध्यमित्यर्थः

२१

शार्दूलवृत्तं ॥ प्रौढात्कायेथेत्कदाहरति ॥ भ्रातर्निकुंजेति । भोनिकुंजभ्रा
तः हेयूथिसखि । हेरसाल । हेआम्रबंधो । हेतपस्विने हेमातः हेपि
तः पिताग्रसीदिति प्रसेकसंबंधः । एतास्मिन्नेते भवंत एवममभ्रात
रादयइत्यर्थः । इतिहेताः किंचित् पृच्छामिकथय । नीरधराभिरामः
सजलधरवत्कांतिः दामोदरः श्रीकृष्णः किंनसमाजगामनाग
वान् ॥ कथयत्विति वाक्यशेषः । दामोदरइतिपदंभक्ताधीनत्वंसू
चयति । तेनकयाचित् भक्तयाभक्त्यावशीकृतास्तिष्टतीभावः ॥
वसंततिलकावृत्तं ९१ परकीयात्काथ्यथेतितामुदाहरति । स्ना
तमिति । काचित्सखीवदति । हेसखि किंतयानतप्तं । तथापि
अद्यापिरयताकाले नसनाथके नेत्रातिथिः नेत्रगोचरइतिअ
र्थः ॥ कथंनकथयेतिशेषः । ततोदर्शयति । वारिदवारिभिर्मेघ
जलैस्नातं । पुनः घनेकाननेवासोनिवासोविरचितः पुनःम
नसिजः कामदेवः शीतैश्चंदनबिंदुभिः आराधितः । एतेन

59

र० टी०

ज्योत्स्नायां रजन्यां कोपि मां मा प्रैक्षिष्टा इति चंदनलेपो ध्वन्यते। पुनः र
जनीजागरणव्रतं न नीता प्रापुनः व्रीडालज्जादक्षिणादानं कृता
स्फक्तेत्यर्थः। तस्यागमनफलं प्रतीक्षयतिभावः ६० शार्दूलवृत्तं॥
सामान्यवनितोत्कां यथेत्युदाहरति॥ कथमिति। कापि वारांग
ना वेश्या धनाभिलाषात् निःपतदस्रुधारा निःपतदस्रुजले
न अक्षालयत् अंगादित्यर्थः। किंभूता वेश्या। कांतः कुंजसंके
स्थानं समुपैति। इत्थं अमुना प्रकारेण चिरं चिरकालं चेतसि
चिंतयतीति विचारयतीति। अत्रोपजातिछंदः। इंद्रचंद्रोपें
द्रवज्रालक्षणमिश्रितपदत्वात् ६१ अथ वासकसज्जां दर्श
यति। अथ मे प्रियवासकरसादि स्पष्टम्॥ वारः सूर्यादिवा राम॰
सक इति विभ्रः। अभ्रेष्टा। सा किं कियनित्यर्थः। मनोरथेत्यादि
